तु सिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दीप्रादुर्भावश्चेति । मूढगर्भोदराशोऽश्मरीभगन्दरमुखरोगेष्वभुक्तवतः कर्म्म कुर्व्वीत । ततः शस्त्रमवचार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात्परिपीड्याङ्गुल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण प्लोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषधयुक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां घनाङ्कवलिकान्दत्त्वा वस्त्रपट्टेन बध्नीयाद्वेदनारक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रैरक्षां कुर्वीत । ततो गुग्गुल्वगुरुसर्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रव्यामिश्रैराज्ययुक्तैर्धूपैर्धूपयेत् । आज्यशेषेण चास्य प्राणान् समालभेत" । "ततः कृतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत् । ततस्तृतीयेऽहनि विमुच्यैवं बध्नीयाद्वस्त्रपट्टेन नचैनं त्वरमाणोऽपरेद्युर्मोक्षयेत् । द्वितीयदिवसे परिमोक्षणाद्विग्रथितो व्रणश्चिरादुपसंरोहति तीव्ररुजश्च भवन्ति । अत ऊर्द्ध्वं देशकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान्विदध्यात् । नचैनं त्वरमाणः सान्तर्दोषं रोपयेत् स ह्यल्पेनाप्यपचारेणाभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति ॥ भवन्ति चात्र । तस्मादन्तर्ब्बहिश्चैव सुशुद्धं रोपयेद्व्रणम् । रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् । हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् ॥ हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् । त्र्यहाद्द्व्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ॥ प्रदीप्तागारवच्चोष्णं तत्र कुर्य्यात् प्रतिक्रियाम् ॥ या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रदुनोति जन्तोः । घृतेन सा शान्तिमुपैति सिक्ता कोष्णेन यष्टीमधुकान्वितेन ॥ अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक्" अस्त्राकारादि विवरणं तत्रैव "विंशतिः शस्त्राणि ॥ तद्यथा । मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्रकवडिशदन्तशङ्क्वेषण्य इति । तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च । वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च । सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे । कुठारिकाव्रीहिमुखारावेतसपत्रकाणि व्यधने सूची च । वडिशोदन्तशङ्कुश्चाहरणे । एषण्येषणे आनुलोम्ये च । सूच्यः सेवने । इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः । तेषामथ यथायोगग्रहणसमासोपायः कर्म्मसु वक्ष्यते । तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे गृह्णीयाच्छेदनान्येवं सर्वाणि । वृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्य्यं वृन्ताग्रे विस्रावणानि । विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्त्राणाञ्च त्रिकूर्चकेन विस्रावयेत् । तत्र प्रच्छादितवृन्तमङ्गुष्ठप्रदेशिनीभ्यां व्रीहिमुखम् । कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्याऽङ्गुष्ठविष्टब्धयाभिहन्यात् । आराकरपत्रैषण्यो मूले । शेषाणि तु यथायोगं गृह्णीयात् । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र नखशस्त्रैषण्यावष्टाङ्गुले सूच्यो वक्ष्यन्ते वडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रमुखे । एषणी गण्डूपदाकारमुखी । प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा मुद्रिका । दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते । शेषाणि तु षडङ्गुलानि । तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राण्यकरालानि चेति शस्त्रसम्पत् । तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः । अतो विपरीतगुणमाददीतान्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम् । तत्र धारा भेदनानां मासूरी । लेखनानामर्द्धमासूरी । व्यधनानां विस्रावणानाञ्च कैशिकी । छेदनानामर्द्धकैशिकीति । तेषां पायना त्रिविधा क्षारोदकतैलेषु । तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु । उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराघनस्नायुच्छेदनेषु । तेषां निशानार्थं श्लक्ष्णशिला माषवर्णा । धारासंस्थापनार्थं शाल्मलीफलकमिति । भवति चात्र । यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम् । सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत् ॥ अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलय इति । शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् । त्वक्सारादिचतुर्व्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥ आहार्य्यच्छेद्यभेद्येषु नखं शक्येषु योजयेत् । विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम् ॥ ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये । गोजीसेफालिकाशाकपत्रैर्विस्रावयेत्तु तान् ॥ एषण्येषण्यलाभे तु बालाङ्गुल्यङ्कुरा हिताः । शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु । कारयेत्करणैः प्राज्ञं कर्म्मारं कर्म्मकोविदम् ॥ प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः । तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा" ॥